# उपसंहारः

एतावता वैशेषिकदर्शनोक्तरीत्या परमाणु-शरीर-पाक-मन-शब्दसिद्धान्तान् विवेच्य तेषां सिद्धान्तानां वैज्ञानिकसमतत्त्वानां सिद्धान्तानां वाऽपि अध्ययनं कृतम्। अधुना प्रत्येकोऽपि सिद्धान्तः कथं वैज्ञानिकपथधिगच्छन्ति इति निरूप्यते।

## वैशेषिकदर्शनस्य परमाणुसिद्धान्तस्य वैज्ञानिकरीत्या विमर्शः

प्रथमाऽध्याये वैशेषिकविज्ञानयोः परमाणुसिद्धान्तः ज्ञातः। उभयोः मतयोः कुत्रचित् भेदः दृश्यते। तार्किकदृष्ट्या आलोचितं वैशेषिकस्य परमाणुः सर्वतो सूक्ष्म इति प्रतिभाति। तथैव विज्ञानपक्षे तस्मादेव पदार्थादाधुनिकस्य *एटम्* इत्यस्य पदार्थस्य अन्वेषणं कृतं विद्वद्भिः।

उभयत्र पश्यामश्चेत् ज्ञायते यत् अयं सूक्ष्मपदार्थः न केनापि दृष्टः। वैशेषिके तर्केनानुमानेन च अस्य साधनं क्रियते यत्र च न कापि हानिः। तथैव वैज्ञानिकैः अपि विभिन्नानां परीक्षणानां परिणामेन *एटम्* इत्यस्य अस्तित्त्वमनुमीयते। *एटम्*-पदार्थोऽपि न द्रष्टुं शक्यते केनापि माध्यमेन। एवमेव तदन्तस्थ अवयवाः अपि विभिन्नपरीक्षणानां परिणामेन अनुमीयते वैज्ञानिकैः।

वैशेषिकानां यथा सृष्टिप्रक्रिया तथैव विज्ञानमप्यङ्गीकरोति। अनन्तपरमाणूनां संयोगेन सृष्टिः जाता इति वैशेषिकवत् विज्ञानमपि अनन्त*एटम्*-पदार्थानां संयोगेन अस्य जगतः उत्पत्तिः जातः इति मन्यते। कार्यद्रव्याणां निर्माणेऽपि समाना प्रक्रिया उभयत्र।

यतोहि एते सर्वेऽपि सिद्धान्ताः उभयत्र समानं दृश्यन्ते तथापि परमाणुः जगतः अन्त्यावयवः अर्थात् अवयवरहितः अविभाज्यश्चेति वैशेषिकाः। विज्ञानस्य मतेऽपि पूर्वं समानमतमासीत्। परं कालान्तरे *एटम्* इत्यस्य अवयवानां सिद्धिः जाता। पुनः तेषामवयवानां वैशेषिकेन सह तुलनां कुर्मश्चेत् ज्ञायते यत् वैशेषिकपरमाणुः इतोऽपि सूक्ष्मतममिति।

यदि वैशेषिकानां परमाणूनां वैज्ञानिकरीत्या विश्लेषणं कुर्मः चेत् तत्र एकः श्लोकः स्मर्तव्यः येन च परमाणोः परिमाणं ज्ञातुं शक्यते। -

जालान्तर्गते भानौ यत्सूक्ष्मं दृश्यते रजः।

तस्य षष्टतमो भागः परमाणुः प्रकीर्तितः॥

अनया रीत्या तु परमाणोः परिमाणं प्रायः $10^{-7}$ x 1/6 इति परिगण्यते। यदि अस्य तुलना *एटम्* इत्यस्य परिमाणेन क्रियते चेत् ज्ञायते यत् वैशेषिकपरमाणुस्तु *एटम्* अपेक्षया स्थूलमेव भवितुमर्हति।

अतः *एटम्* एव परमाणुः इति कथने कश्चन संशयो जायते परन्तु अन्ये प्रक्रियादयस्तु उभयत्र समानाः दृश्यन्ते। एवं शोधेनानेन ज्ञातं यत् वैशेषिकानां परमाणुः एव आधुनिकस्य *एटम्* इत्यस्य बीजसिद्धान्तः आसीदिति। अतः वैज्ञानिकाः वैशेषिकस्य अमुं सिद्धान्तं न विरुद्धयन्ति। अतः अयं परमाणुसिद्धान्तः वैज्ञानिकपथमधिगच्छति इति निरूप्यते।

**वैशेषिकदर्शनस्य शरीरसिद्धान्तस्य वैज्ञानिकरीत्या विमर्शः**

शोधस्यास्य द्वितीयाऽध्याये वैशेषिकदर्शनस्य शरीरविवेचनसम्बद्धविषयानामवलोकेनेनेदं स्पष्टं जायते यत् शरीरस्योत्पत्तिविकासनिरूपणे जीवविज्ञानशरीरविज्ञानयोः केचन सिद्धान्ताः सम्बद्धाः वर्तन्ते।

अत्र अवधेयमिदं यत् वैशेषिकानां शरीरं पार्थिव-जलीय-वायवीय-तैजसेति चतुर्धा। तेष्वपि पार्थिवस्यैव योनिजमयोनिजं च। अन्येषामयोनिजमेव। विज्ञाने तु न तादृशाः शरीरभेदाः वर्तन्ते। लोके विद्यमानशरीराणामेव विज्ञाने विवेचनं क्रियते। अतस्तस्मात् तानि शरीराणि पार्थिवशरीराणीति स्वतः अवगन्तुं शक्यते।

वैशेषिकदर्शनमिव आधुनिकविज्ञानेऽपि शरीराणां योनिजाऽयोनिजेति द्विधा विभाजनमस्ति। विज्ञाने योनिजशरीराणि लैङ्गिकशरीराणीति अयोनिजशरीराणि अलैङ्गिकशरीराणीति नाम्ना अभिधीयन्ते। उभयत्राऽपि योनिजशरीरस्योत्पत्तिः शुक्रशोणितसंयोगेन जायते। यत्र च तदभावः तत् शरीरमयोनिजमित्युच्यते।

पार्थिवे मनुष्यादिनां शरीरं योनिजमयोनिजं च। वैशेषिके वनस्पतीनां शरीराङ्गीकारे अपि न तेषां गभीरचर्चा तत्र विद्यते। विज्ञाने वनस्पतयोऽपि योनिजाः अयोनिजाश्च (लैङ्गिकाः अलैङ्गिकाश्च)।

यथा वैशेषिकानां योनिजशरीरस्य जरायुज-अण्डजेति द्विधा वर्गीकरणमस्ति तथैव विज्ञानमपि योनिजशरीरं जरायुजम्-अण्डजमिति अङ्गीकरोति। पुनः अयोनिजशरीरं यथा वैशेषिकमते शुक्रशोणितसंयोगं विना उत्पद्यते तथैव विज्ञानमतमपि। तेषु वैशेषिकाः देवतानां क्षुद्रजन्तूनां शरीराणि अयोनिजानीति मन्यन्ते। विज्ञाने तु देवतानां विषये न किमपि प्रमाणं लभ्यते परन्तु विज्ञानम् 'अमीबा' इत्यादीनां क्षुद्रजन्तूनां शरीरमयोनिजमिति प्रमाणयति।

जरायुजेषु गर्भस्थशिशोः शरीरं मात्राभुङ्क्तभोजनस्य परिपाकेन विकसते। ततः पूर्णशरीरस्योत्पत्तिः। इयं वैशेषिकप्रक्रियाऽपि विज्ञानसम्मतमेव।

वैशेषिकदर्शने शरीरोत्पत्तेः यः शरीरसिद्धान्तः प्रदर्शितः विज्ञानमपि तत्पथमेव अधिगच्छति। विज्ञाने च एते सर्वे सिद्धान्ताः विशदीकृताः। तस्मात् इदं वक्तुं शक्यते यत् वैशेषिकदर्शनस्य अयं सिद्धान्तः वैज्ञानिकमेव।

## वैशेषिकदर्शनस्य पाकसिद्धान्तस्य वैज्ञानिकरीत्या विमर्शः

तृतीयाऽध्याये पाकसिद्धान्तस्य अध्ययनेन ज्ञायते यत् वैशेषिकदर्शनविज्ञानयोः पाकसिद्धान्तः प्रायः समानं वर्तते। वैशेषिकस्य पाकप्रक्रियायै तेजसः अपेक्षाऽवश्यं वर्तते।

तथैव रसायनशास्त्रेऽपि काचन ऊर्जायाः अपेक्षा वर्तते एव। सा च ऊर्जा रसायनशास्त्रे 'Energy' इति पदेनाभिधीयते।

वैशेषिकदर्शनस्य पाकप्रक्रियायां पदार्थे कानिचन परिवर्तनानि जायन्ते। तस्यां प्रक्रियायां पदार्थेषु तेजसंयोगेन परमाण्वन्तं विभागः तदनन्तरं पुनः परिवर्तनानुकूलं नूतनपदार्थाय द्व्यणुकादिक्रमेण परमाणूनां संयोगः जायते। इयमेव प्रक्रिया विज्ञानेऽपि निरूपिता। रासायनिकक्रियासु पदार्थानाम् *एटम्* इत्यस्य विघटनं जायते ततः पुनस्तेषां नूतनपदार्थानुकूलं संयोगोऽपि जायते।

वैशेषिकदर्शनस्य पाकसिद्धान्ते पाकस्य परिणामत्वेन पदार्थेषु रूपरसगन्धस्पर्शानां गुणानां परिवर्तनं जायते। विज्ञानस्य मतानुसारमपि रासायनिकक्रियाणां परिणामत्वेन पदार्थेषु रूपादिगुणानां परिवर्तनं दृश्यते। एवमेव कुत्रचित् पाकक्रियया सम्पूर्णस्य पदार्थस्यैव परिवर्तनमङ्गीकुर्वन्ति वैशेषिकाः। वैज्ञानिका अपि समानपरिवर्तनं मन्यन्ते। तस्योदाहरणत्वेन दुग्धस्य दध्नौ परिवर्तनं स्वीकृतः अस्मिन् प्रबन्धे।

एतद्विहाय आधुनिकविज्ञाने अन्येऽपि क्रियाः जायन्ते रासायनिकपरिवर्तनेषु। ते च विस्तृततया निरूपिताः रसायनशास्त्रे। परं सर्वासु रसायनिकक्रियासु जायमानानि परिणामानि अत्र न प्रदर्शितानि। रसायनशास्त्रे जायमानासु क्रियासु वैशेषिकदर्शनस्य पाकप्रक्रिया अन्यतमा।

अस्मात् अध्ययनाज्ज्ञायते यत् वैशेषिकदर्शनस्य पाकसिद्धान्तः वैज्ञानिकरीत्याऽपि सिद्ध्यते इति न लेशोऽपि सन्देहः।

## वैशेषिकदर्शनस्य मनस्सिद्धान्तस्य वैज्ञानिकरीत्या विमर्शः

चतुर्थे अध्याये वैशेषिकरीत्या विज्ञानरीत्या च मनसः सिद्धान्तस्य विमर्शः कृतः। वैशेषिकाचार्याणां मतानुसारेण मनः किञ्चिदिन्द्रियं येनात्मनि बाह्यवस्तूनां ज्ञानं जायते। सुखदुःखादिवेदनानां ज्ञानायापि मन एव हेतुः। यतोहि वैशेषिके ज्ञानस्याधिकरणमात्मा इति स्वीक्रियते परन्तु मनसा सम्बद्धे आत्मन्येव ज्ञानमुत्पद्यते। अत एव मृतशरीरेषु आत्ममनसोः संयोगाभावाज्ज्ञानाभावः। बाह्यवस्तूनां प्रत्यक्षादिषु तु चक्षुरादिभिः इन्द्रियैः सह मनसः संयोगः, तस्य च आत्मना संयोगेन पदार्थज्ञानं जायते। स्मृत्यादिष्वपि आत्ममनसोः संयोग एव कारणम्। न्यायवैशेषिकयोः सर्वेषां ज्ञानमात्मनि मनस्संयोगेन जायते।

विज्ञानं त्वात्मनः स्वरूपं क्वचिन्नाङ्गीकरोति परन्तु वैशेषिकोक्तस्य मनसोऽङ्गीकारः सर्वविधया कुरोति। विज्ञानमतेऽपि वस्तूनां प्रत्यक्षीकरणाय मनसः अस्तित्वमङ्गीक्रियते। तस्य स्वरूपं क्वचिद्वैशेषिकोक्तमनसः भिद्यते। मनोविज्ञानानुसारेण मनसः कश्चन गुणः चेतनेत्युच्यते। तया चेतनया एव मनसः प्रत्यक्षादीनि कार्याणि चलन्ति।

न्यायवैशेषिकदर्शनयोः चैतन्ययुक्तपुरुषः आत्ममनसोः संयोगेन, ततः इच्छाद्वेषादिभिः प्रवृत्तिर्जायते। विज्ञानेऽपि समाना रीतिः परन्तु न आत्ममनसोः संयोगेन। तत्र चेतनायाः विभिन्नैः प्रकारैः इच्छादीभिः मनुष्येषु प्रवृत्तिर्जायते।

न्यायवैशेषिकयोरिव विज्ञानेऽपि पदार्थस्य प्रत्यक्षीकरणाय पदार्थस्य बाह्येन्द्रियैः संयोगः तेषां च मनसा संयोगः अपेक्षितमेव। अपि च मनः एकस्मिन् समये एकमेव पदार्थं गृह्णाति। सुखदुःखाद्यः वेदनाः क्रोधादयः भावाः स्मृत्यादयः सर्वेऽपि मनस एव प्रक्रियाः। भेदस्तु अयमेव यत् दर्शने आत्मन्येतेषां ज्ञानमुत्पद्यते, विज्ञाने मस्तिष्कं ज्ञानस्याधिकरणम्। उभयत्र ज्ञानहेतुः मन एव। विज्ञाने यन्त्रादीनां साहाय्येन शरीरस्याध्ययनेन चेदं स्पष्टं भवति यत्

विभिन्ननाडीभिः मस्तिष्के ज्ञानमुत्पद्यते। कस्याश्चित् नाड्याः विनष्टे सति तत्सम्बन्धितज्ञानं नैव जायते।

स्वप्नप्रक्रियाऽपि वैशेषिकाः वैज्ञानिकाश्च मानसिकमित्येव स्वीकुर्वन्ति। यतोहि दर्शनविज्ञानयोः स्वप्नप्रकाराः भिन्नाः तथापि तेषामुत्पत्तेः कारणानि साम्यानि।

एवं यद्यपि दर्शनविज्ञानयोः मनस्विषये किञ्चिद्भेदोः दृश्यते तथापि मानसिकप्रक्रियाः समाना एव।

## वैशेषिकदर्शनस्य शब्दसिद्धान्तस्य वैज्ञानिकरीत्या विमर्शः

अन्तिमे पञ्चमे अध्याये वैशेषिकदृष्ट्या वैज्ञानिकरीत्या च शब्दसिद्धान्तः निरूपितः। शब्दसिद्धान्तस्य विषयेऽपि वैशेषिकदर्शनविज्ञानयोः अधिकः भेदः न दृश्यते परन्तु कस्यचिद्विषस्य निरूपणावसरे वैशेषिकमतमिदं विज्ञानात् किञ्चिद्भिद्यते। अस्मिन् शोधप्रबन्धे ध्वनेः उत्पत्तिहेतुः, श्रोतुः कर्णपर्यन्तं तस्य सञ्चरणं, सञ्चरणमाध्यमञ्च विवेचिताः।

तत्राऽदौ ध्वनेः उत्पत्तिविषये पश्यामश्चेत् वैशेषिकदर्शनानुसारेण ध्वनिः उत्पत्त्याधारेण संयोगज-विभागज-शब्दजेति त्रिधा विभक्तः। अर्थात् ध्वनिः वस्तुद्वयोः संयोगेन वा विभागेन वा उत्पद्यते। तत्र विज्ञानमतेऽपि ध्वनेः उत्पत्तिः वस्तुनः घर्षणेन वा एकेन अन्यस्मिन् प्रहारेण वा एकस्य अन्यस्मात् पृथकीकरणेन वा जायते। विज्ञानस्य वस्तुनः घर्षणेन प्रहारेण वा उत्पन्नः ध्वनिः वैशेषिकस्य संयोगज एव। घर्षणे वा प्रहारे वा वस्तुनोः संयोगोऽपेक्षित एव। कस्यचित वस्तुनः अन्यस्मात् पृथकीकरणेन जायमानः ध्वनिः तु विभागज एवेति साक्षादवगम्यते। अतः वैशेषिकदर्शने विज्ञाने च ध्वनेः उत्पत्तिप्रकाराः प्रायः समानाः।

ध्वनिः वा शब्दो वा केन माध्यमेन सञ्चरतीत्यस्मिन् विषये कश्चन भेदो दृश्यते पक्षद्वये। वैशेषिकास्तु शब्दगुणकमाकाशमित्याहुः। तेषां मते शब्दः आकाशे एव सञ्चरति। विज्ञानमते तु

विभिन्नैः परीक्षणैः निर्धारितमिदं यत् ध्वनिः वायुना वा कठोरपदार्थेन (solid) तरलपदार्थेन वा (liquid) अपि सञ्चरति। एतेषु ध्वनेः सञ्चरणाय वायुरेव उत्तम: माध्यम: वर्तते।

ध्वनेः सञ्चरणप्रक्रियायाः विषये चिन्तयामश्चेत् वैशेषिकाः वैज्ञानिकाश्च समाना प्रक्रियाऽङ्गीक्रियते। उभावपि ध्वनिः तरङ्गैः स्वोत्पत्तिस्थलात् श्रोतुः कर्णपर्यन्तं यातीति मन्येते। वैशेषिकाः प्रक्रियामिमां इमां वीचितरङ्गन्यायेन कदम्बगोलकन्यायेन वा विवृणुवन्ति। वैज्ञानिका अपि ध्वनिः तरङ्गेन एव श्रोतुः कर्णपर्यन्तं गच्छतीति मन्यन्ते। वैज्ञानिकास्तु प्रक्रियामिमां विभिन्नैः परीक्षणैः सुस्पष्टतया निरूपयन्ति।

अयं तु लोकनियमः यत् पूर्वतनसिद्धान्तेषु परवर्तिभिः परिष्कारः क्रियते एव। एवं वैशेषिकसिद्धान्तोऽयं यतोहि वैज्ञानिकचिन्तनात् क्वचिद्भिद्यते परन्तु तस्य अयमर्थः नास्ति यत् मतमिदं सर्वथा निराधारः। शब्दसिद्धान्तस्य उभयोः मतयोः अध्ययनेन च ज्ञायते यत् शब्दस्य ध्वनेः वा उत्पत्तिसञ्चरणादि विषयेषु अध्येतुं वैशेषिका एव तत्र मार्गं दर्शितवन्त इव वैशेषिकस्य सिद्धान्तोऽयं वैज्ञानिकीं धारां प्राप्नोतीति।

एतस्मात् अध्ययनात् ज्ञातं यत् केचन सिद्धान्ताः पूर्णतया वैज्ञानिकं भवति। केषाञ्चन सिद्धान्तानां यतोहि विज्ञानेन सह मतभेदः दृश्यते तथापि न पूर्णतया विरुद्धाः भवन्ति। तार्किकरीत्या निरूपिताः ते सिद्धान्ताः आधुनिकविज्ञानस्य मूलभूतसिद्धान्तत्वेन दृश्यते। अतः तेऽपि वैज्ञानिकमेव इति सिध्यते अनेन शोधेन।